यथा, भूतडामरतन्त्रे ।
"नीचगामङ्गनां प्राप्य चन्दनैर्मकलं लिखेत् ॥"
(निम्नगे च । यथा, वृहत्संहितायाम् ।१८।२१।
"अखरपटुमयूखो नीचगोऽन्यैर्जितो वा
न सकलफलदाता पुष्टिदोऽतोऽन्यथा यः ॥")
नीचगा, स्त्री, (नीचं निम्नं गच्छतीति । गम+ ड । टाप् ।) निम्नगा । नदी । यथा,—
"नीचगा तु नदी नीचो नीचगो नीचगं जले ।"
इति कोषः ॥
अपि च ।
"सङ्गमयति विद्येव नीचगापि नरं सरित् ।
समुद्रमिव दुर्द्धर्षं नृपं भाग्यमतः परम् ॥"
इति हितोपदेशः ॥
नीचभोज्यः, पुं, (नीचैर्यवनादिभिर्भोज्यः ।) पलाण्डुः । इति शब्दचन्द्रिका ॥ पामरभक्ष्ये, त्रि ॥
नीचवज्रं, क्ली, (नीचमनुत्कृष्टं वज्रम् ।) वैक्रान्तमणिः । इति राजनिर्घण्टः ॥
नीचिकी, स्त्री, नैचिकी । इत्यमरटीकायां भरतः ॥
नीचैः, [स्] अ, (नि+चि+"नौ दीर्घश्च ।" उणां । ५ । १२ । इति डैसिः निशब्दस्य दीर्घश्च ।) अल्पम् । अनुच्चम् । इत्यमरः ॥ (यथा, मेघदूते । १०८ ।
"नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ॥")
नीड़ः, पुं क्ली, (नितरां ईड्यते स्तूयते सुखस्थत्वादिति । नि+ईड़ स्तुतौ+घञ् ।) पक्षिवासस्थानम् । पाखीरवासा इति भाषा ॥ तत्पर्य्यायः । कुलायः २ । इत्यमरः । २ । ५ । ३७ ॥ (यथा, भागवते । ३ । ५ । ३६ ।
"मार्गन्ति यत्ते मुखपद्मनीड़ै-
श्छन्दःसुपर्णैरृषयो विविक्ते ॥")
स्थानम् । इति मेदिनी । डे, १७ ॥ (रथाधिष्ठानस्थानम् । यथा, रामायणे ।५ । ४८ । १२ ।
"स भग्ननीड़ः परिवृत्तकूवरः
पपात भूमौ हतवाजिरम्बरात् ॥")
नीड़जः, पुं, (नीड़े जायते इति । जन+डः ।) पक्षी । इति हेमचन्द्रः । ४ । ३८२ ॥
नीड़जेन्द्रः, पुं, (नीड़जानां पक्षिणामिन्द्रः ।) गरुड़ः । यथा,—
"अनडुहि जितनीड़जेन्द्रवेगे
हतनिविड़ासनसुजृम्भताघपीड़े ।
स्मरशमनतड़ित्कड़ारदृष्टिं
जड़सुहृदाविव शोभिचूड़मीड़े ॥"
इति प्राचीनशिवस्तुतिः ॥
नीड़ोद्भवः, पुं, (नीड़े कुलाये उद्भव उत्पत्तिर्यस्य ।) पक्षी । इत्यमरः । २ । ५ । ३४ ॥
नीतं, त्रि, (नी+क्तः ।) प्राप्तम् । नेओया इति भाषा ॥ यथा,—
"नीतं यदि नवनीतं नीतं नीतं किमेतेन ।
आतपतापितभूमौ माधव ! मा धाव मा धाव ॥"
इत्युद्भटः ॥
नीतिः, स्त्री, (नीयन्ते संलभ्यन्ते उपायादय ऐहिकामुष्मिकार्था यस्यामनया वा । नी+ अधिकरणे करणे वा क्तिन् ।) नयः । (नी+ भावे क्तिन् ।) प्रापणम् । इति मेदिनी । ते, ३० ॥ अथ नीतिशास्त्रं लिख्यते ।
"नयस्य विनयो मूलं विनयः शास्त्रनिश्चयः ।
विनयो हीन्द्रियजयस्तद्युक्तश्शास्त्रमिच्छति ॥
आत्मानं प्रथमं राजा विनयेनोपपादयेत् ।
ततोऽमात्यान् ततो भृत्यांस्ततः पुत्त्रांस्ततः प्रजाः ॥
सदानुरक्तप्रकृतिः प्रजापालनतत्परः ।
विनीतात्मा हि नृपतिर्भूयसीं श्रियमश्नुते ॥
एवंकरणसामर्थ्यात् संयम्यात्मानमात्मना ।
नयानयनविद्राजा कुर्व्वीत हितमात्मनः ॥
जितेन्द्रियस्य नृपतेर्नीतिशास्त्रानुसारिणः ।
भवन्त्युज्ज्वलिता लक्ष्म्यः कीर्त्तयश्च नभस्पृशः ॥"
इति नीतिमयूखद्वितीयप्रयोगः ॥
सगर उवाच ।
"यया नीत्या प्रयोक्तव्यः सुत आत्मा प्रिया तथा ।
तेषां विशेषैः सहितं सदाचारं वदस्व मे ॥"
और्व्व उवाच ।
क्रमेण शृणु राजेन्द्र ! यया नीत्या नियुज्यते ।
आत्मा सुतो वा भार्य्या वा तद्विशेषं शृणुष्व मे ॥
ज्ञानवृद्धांस्तपोवृद्धान् वयोवृद्धान् सुदक्षिणान् ।
सेवेत प्रथमं विप्रानसूयापरिवर्ज्जितान् ॥
तेभ्यश्च शृणुयान्नित्यं वेदशास्त्रविनिर्णयम् ।
यदूचुस्ते च तत् कार्य्यं प्राज्ञैश्चैतन्नृपश्चरेत् ॥
पञ्चेन्द्रियाणि पञ्चाश्वाः शरीरं रथ उच्यते ।
आत्मा रथी कशा ज्ञानं सारथिर्म्मन उच्यते ॥
अश्वान् सुदान्तान् कुर्व्वीत सारथिं चात्मनो वशम् ।
कशा भूप ! दृढ़ा कार्य्या शरीरस्थिरता तथा ॥
सुदान्तांस्तु समारुह्य सैन्धवान् स्यन्दनी यथा ।
अश्वानामिच्छया गच्छन्नुत्पथं प्रतिपद्यते ॥
यत्नावशः सारथिस्तु स्वेच्छया प्रेरयन् हयान् ।
नयेत् परवशं सम्यक् प्रथितं वीरमच्युत ॥
यथेन्द्रियाणि नृपतिर्व्विषयार्थं परिग्रहे ।
स्ववशानि प्रकुर्व्वीत मनोज्ञानं दृढं तथा ॥
ज्ञाने दृढ़े कशायां वा दृढ़ायां नृपसत्तम ! ।
सारथिः स्ववशो दान्तोऽनीशः प्रेरयितुं हयान् ॥
अतो नृपः स्वेन्द्रियाणि वशे कृत्वा मनस्तथा ।
ज्ञानमार्गमधिष्ठाय प्रकुर्व्वीतात्मनो हितम् ॥
भोक्तव्यं स्वेच्छया भूपो न कुर्य्यादुत्पथे रतिम् ।
द्रष्टव्यमिति द्रष्टव्यं न द्रष्टव्यञ्च स्वेच्छया ॥
श्रोतव्यमिति श्रोतव्यं नाधिकं श्रवणे चरेत् ।
शास्त्रतत्त्वरते धीरः श्रुतिवशो भवेन्नहि ॥
एवं स्पर्शं तथा वापि वशीकृत्येच्छया नृपः ।
स्वेच्छयैवोपभुञ्जीत नोद्दामं विषयं भजेत् ॥
एवं यदि भवेद्राजा तदा स स्याज्जितेन्द्रियः ।
जितेन्द्रियत्वे हेतुश्च शास्त्रवृद्धोपसेवनम् ॥
अवृद्धसेवशास्त्रज्ञो नृपः शत्रुवशो भवेत् ।
तस्माच्छास्त्रमधिष्ठाय भवेद्राजा जितेन्द्रियः ॥
धृतिः प्रागल्भ्यमुत्साहो वाक्पटुत्वं विवेचनम् ।
दक्षत्वं धारयिष्णुत्वं दानं मैत्री कृतज्ञता ॥
दृढ़शासनता सत्यं शौचं मतिविनिश्चयः ।
पराभिप्रायवेदित्वं चारित्वं धैर्य्यमापदि ॥
क्लेशधारणशक्तिश्च गुरुदेवद्विजार्च्चनम् ।
अनसूया ह्यकोपित्वं गुणानेतान्नृपोऽभ्यसेत् ॥
कार्य्याकार्य्यविभागश्च धर्म्मार्थौ काममेव च ।
दानस्य विषये सामयोगमेवोपलक्षते ॥
सततं प्रतिबुध्येत कुर्य्यादवसरेऽपि तत् ।
साम दानञ्च भेदश्च दण्डश्चेति चतुष्टयम् ॥
ज्ञात्वोपायांस्तु तत्स्थाने तानुपायान् प्रयोजयेत् ।
साम्नस्तु विषये भेदो मध्यमः परिकीर्त्तितः ॥
दानस्य विषये दण्डो ह्यधमः परिकीर्त्तितः ।
दण्डस्य विषये दानं तदप्यधममुच्यते ॥
साम्नस्तु गोचरे दण्डो ह्यधमादधमः स्मृतः ।
सौजन्यं सततं श्रेयं भूभृतो भेददण्डयोः ॥
साम्नो दानस्य च तथा सौजन्यं याति गोचरे ।
कामः क्रोधश्च लोभश्च हर्षो मानमदौ तथा ।
एतानतिशयान् राजा शत्रूनिव विनाशयेत् ॥
सेव्याः कालेषु युक्त्यैते लोभगर्व्वौ विवर्ज्जयेत् ।
तेज एव नृपाणान्तु तीव्रं सूर्य्यस्य वै यथा ॥
तत्र गर्व्वं रोगयुक्तकायवत्तत्तु संत्यजेत् ।
आखेटकाक्षौ स्त्रीसेवा पानञ्चैवात्मदूषणम् ॥
वाग्दण्डयोश्च पारुष्यं सप्तैतानि विवर्ज्जयेत् ।
परस्त्रीषु विरक्तासु सेवामेकान्ततस्त्यजेत् ॥
सतीषु निजनारीषु प्रेमृणा कुर्य्याच्च सेवनम् ।
रतिपुत्त्रफला दारास्तांस्तु नैकान्ततस्त्यजेत् ॥
तयोः सिद्धेः स्त्रियः सेव्या वर्ज्जयित्वातिसक्तताम् ।
मृगयान्तु प्रमादानां स्थानं नित्यं विवर्ज्जयेत् ॥
अक्षांस्तथा न कुर्व्वीत सत्कार्य्यासक्तिनाशनान् ।
अन्यैः कृतं कदाचित्तु सेवेत नात्मनाचरेत् ॥
अकार्य्यकरणे बीजं कृत्यानाञ्च विवर्ज्जनम् ।
वर्ज्जयेत् सततं पानं शोचमाक्षयनाशनम् ।
अर्थक्षयकरं नित्यं स्वचैवात्मदूषणम् ॥
अभिशस्तेषु चौरेषु घातकेष्वाततायिषु ।
सततं पृथिवीपालो दण्डपारुष्यमाचरेत् ॥
नान्यत्र दण्डपारुष्यं कुर्य्यान्नृपतिसत्तमः ।
वाक्पारुष्यन्तु सर्व्वत्र नैव कुर्य्यात् कदाचन ॥
रक्षणीयं सदा सत्यं सत्यमेकं परायणम् ।
धर्म्मं तेनाश्रिताश्चैव प्रजावान्नृप आचरेत् ॥
यानासनाश्रयद्वैधसन्धयो विग्रहस्तथा ।
अभ्यसेत् षड्गुणानेतान् तेषां ज्ञानञ्च शाश्वतम् ॥
यः प्रमाणं न जानाति स्थाने वृद्धौ तथा क्षये ।
कोषे जनपदे दण्डे न स राज्येऽवतिष्ठते ॥
कोषे जनपदे दण्डे चैकैकत्र भयं त्रयम् ।
प्रस्तावादिनियुञ्जीत रक्षैर्नैकान्ततस्त्विमान् ॥
मित्रे शत्रावुदासीने प्रभावं विनिपीड़येत् ।
उत्साही विजिगीषायां धर्म्मज्ञोऽरिवर्गके ॥
शरीररक्षाणनिर्म्माणे क्रियेत सततं नृपैः ।
मन्त्रनिश्चयसम्भूतां बुद्धिं सर्व्वत्र योजयेत् ॥
अमात्ये शासने राज्ये पुरेष्वन्तःपुरेषु च । ॥ ।
कृषिर्दुर्गञ्च वाणिज्यं सख्यानां तरसाधनम् ।
आदानं सैन्यकरयोर्बन्धनं गजवाजिनोः ॥
शून्यसद्मसुखानाञ्च योजनं सततं जनैः ।
प्रपावागारसेतूनां रचनञ्चेति चाष्टमम् ॥